परलोकगामी व्यवहारिको जीव उच्यते।"बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते" श्रुतिः। "बालाग्रशतशोभागः कल्पितस्तु सहस्रधा। तस्यापि शतशोभागो जीवः सूक्ष्म उदाहृतः" शङ्खः। "जीवो नाम देहादिव्यतिरिक्तस्तत्साक्षी तत्पदार्थो योऽयं विज्ञानमयः योऽयं संसरति योऽयं संसारी नतु देहादिर्जीवः तस्य दृश्यस्य द्रष्टृत्वानुपपत्तेः। "अस्ति देवि! परं ब्रह्मस्वरूपी निष्कलः शिवः। सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलोऽव्ययः। स्वयं ज्योतिरनाद्यन्तो निर्विकारः परात्परः। निर्गुणः सच्चिदानन्दस्तदंशा जीवसंज्ञकाः। अनाद्यविद्योपहिता यथाग्नौ विस्फुलिङ्गकाः। देहाद्युपाधिसम्भिन्नास्ते कर्म्मभिरनादिभिः। सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः। तत्तज्जातियुतं देहमायुर्भोगञ्च कर्म्मजम्। प्रतिजन्म प्रपद्यन्ते तेषामप्यपरं पुनः। सूक्ष्मं लिङ्गशरीरं तदामोक्षादक्षयं प्रिये!"कुलार्ण०। १७विष्णौ, "जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः" विष्णु०सह०। तत्र वृहस्पतौ "जीवः सप्तनवद्विपञ्चमगतः" "जीवार्किभौमज्ञज्यानां क्षेत्राणि सुरजादयः" ज्योति०।१८पुष्यनक्षत्रे च। तस्य जीवाधिष्ठातृकत्वात् तथात्वम् अश्लेषाशब्दे ४६८ पृ० दृश्यम्। घटसंहृत आकाशे नीयमाने यथा घटे। घटो नीयेत नाकाशं तद्वत् जीवो नभोपमः"। आर्हतमतसिद्धजीवभेदाश्च अर्हच्छब्दे ३८४ पृ० दृश्याः। स च जीवो विभुरिति साङ्ख्यनैयायिकवैशेषिकपातञ्जलवेदान्तिनः। अणुपरिमाण इति रामानुजादयः। मध्यमपरिमाणः इति माध्यमिका। आत्मनशब्दे ६७२पृ०दृश्यम् "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" छा० उ०। "भावनाख्यस्तु संस्कारो जीववृत्ती तिमौ गुणौ" भाषा० जीव-क १६जीवनयुक्ते त्रि०।"कर्षन्तो लाङ्गलैः पुंसो घ्नन्ति भूमिशयान् बहून्। जीवानन्यांश्च सुबहूंस्तत्र किं प्रतिभाति ते। धान्यबीजानि यान्याहुर्व्रीह्यादीनि द्विजोत्तम!। सर्वाण्येतानि जीवानि तत्र किं प्रतिभाति ते। अध्याक्रम्य पशूंश्चापि घ्नन्ति वै भक्षयन्ति च। वृक्षांस्तथौषधीश्चापि छिन्दन्ति पुरुषा द्विज!। जीवा हि बहवो ब्रह्मन्! वृक्षेषु च फलेषु च। उदके बहवश्चापि तत्र किं प्रतिभाति ते। सत्त्वैः सत्त्वानि जीवन्ति बहुधा द्विजसत्तम!। प्राणिनोऽन्योन्यभक्षाश्च तत्र किं प्रतिभाति ते। चंक्रम्यमाणा जीवांश्च धरणीसंश्रितान् बहून्। पद्भ्यां घ्नन्ति नरा विप्र! तत्र किं प्रतिभाति ते। उपविष्टाः शयानाश्च घ्नन्ति जीवाननेकशः। ज्ञानविज्ञानवन्तश्च तत्र किं प्रतिभाति ते। जीवैर्ग्रस्तमिदं सर्वमाकाशं पृथिवी तथा। अविज्ञानाच्च हिंसन्ति तत्र किं प्रतिभाति ते। अहिंसेति यदुक्तं हि पुरुषैर्विस्मितैः पुरा। के न हिंसन्ति जीवान् वै लोकेऽस्मिन् द्विजसत्तम!।"भा० व०२०७अ०। अत्र जीवस्य हिंसा देहवियोजनम्।

**जीवक** पु० जीवयति जीव+णिच्-ण्वुल्। १अष्टवर्गान्तर्गते १ओषधिभेदे"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत्" तदभावे विदारीमूलं प्रतिनिधितया देयमिति"। "जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ" भावप्र० २पीतसालवृक्षे ३क्षपणके च पु०। जीव-ण्वुल्। ४प्राणधारके त्रि० मेदि०। ५सेवके ६वृद्ध्याजीविनि त्रि० ७अहितुण्डिके पु० मेदि०।

**जीवकाद्यतैल** न० चक्रदत्तोक्ते तैलभेदे। तच्च तैलं द्विविधं लघुवृहद्भेदात् यदाह तत्रैव "जीवकर्षभकौ द्राक्षा सिता यष्टी बलोत्पलैः। तैलं नस्यं पयः पक्वं वातपित्तशिरोगदे"। लघु। "जीवकर्षभकौ द्राक्षा मधूकं मधुकं बला। नीलोत्पलं चन्दनञ्च विदारी शर्करा तथा। तैलप्रस्थं पचेदेभिः शनैः पयसि षड्गुणैः। जाङ्गलस्य तु मांसस्य तुलार्द्धस्य रसेन तु। सिद्धमेतद्भवेन्नस्यं तैलमङ्गविशेषकम्। बाधिर्य्यं कर्णशूलञ्च तिमिरं गलशुण्ठिकाम्। वातिकं पैत्तिकञ्चैव शीर्षरोगं नियच्छति। दन्तचालं शिरःशूलमर्दितञ्चापकर्षति" वृहत्। चक्रद०।

**जीवघन** पु० जीव एव घनो मूर्त्तिरस्य। हिरण्यगर्भे तस्य सर्वजीवसमष्टिरूपत्वात् तथात्वं यथाह प्रश्नोप०भा०। ओम् शब्दे १५६० पृ० तद्वाक्यम् दृश्यम्। "स एतस्माज्जीवघनात् परात् परम्"।

**जीवजीव** पुंस्त्री जीवञ्जीव+पृषो०। चकोरखगे शब्दर० स्त्रियां जातित्वात् ङीष्। स्वार्थे क। तत्रार्थे। "हृत्वा रक्तानि वासांसि जायते जीवजीवकः" मनुः।

**जीवञ्जीव** पुंस्त्री जीवं जीवयति विषनाशकत्वात् जीव-बा० खच्। चकोरपक्षिणि अमरः स्त्रियां जातित्वात् ङीष्। "जीवञ्जीविकसङ्घाश्चाप्यनुगच्छन्ति पाण्डुतान्" भा० उ०